# Dakshinakalikasahasranamavali

# दक्षिणकालिकासहस्रनामावलिः

## Document Information

Text title : Dakshinakalikasahasranamavali

File name : dakShiNakAlikAsahasranAmAvaliH.itx

Category : devii, devI, nAmAvalI, sahasranAmAvalI

Location : doc_devii

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shyAmArahasyam | chaturthaH parichChedaH || See corresonding sahasranAmastotram

Latest update : March 19, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 19, 2025

*sanskritdocuments.org*

# दक्षिणकालिकासहस्रनामावलिः

(श्यामारहस्ये)
अस्य श्रीदक्षिणकालिकासहस्रनामस्तोत्रस्य
महाकालभैरव ऋषिस्त्रिष्टुप्छन्दः
श्मशानकाली देवता धर्मार्थकाममोक्षार्थे विनियोगः ।

ॐ श्मशानकालिकायै नमः । काल्यै । भद्रकाल्यै । कपालिन्यै । गुह्यकाल्यै । महाकाल्यै । कुरुकुल्लायै । विरोधिन्यै । कालिकायै । कालरात्र्यै । महाकालनितम्बिन्यै । कालभैरवभार्यायै । कुलवर्त्मप्रकाशिन्यै । कामदायै । कामिन्यै । कन्यायै । कमनीयस्वरूपिण्यै । कस्तूरीरसलिप्ताङ्ग्यै । कुञ्जरेश्वरगामिन्यै । ककारवर्णसर्वाङ्ग्यै । कामसुन्दर्यै । कामार्तायै । कामरूपायै । कामधेनवे । कलावत्यै । कान्तायै । कामस्वरूपायै । कामाख्यायै । कुलकामिन्यै । कुलीनायै । कुलवत्यम्बायै । दुर्गायै । दुर्गतिनाशिन्यै । कौमार्यै । कुलजायै । कृष्णायै । कृष्णदेहायै । कृशोदर्यै । कृशाङ्ग्यै । कुलिशाङ्ग्यै । क्रीङ्कार्यै । कमलायै । कलायै । करालास्यायै । कराल्यै । कुलकान्तायै । अपराजितायै । उग्रायै । उग्रप्रभायै । दीप्तायै । विप्रचित्तायै । महाबलायै । नीलायै । घनायै । मेघनादायै । मात्रायै । मुद्रायै । मितामितायै । ब्राह्म्यै । नारायण्यै । भद्रायै । सुभद्रायै । भक्तवत्सलायै । माहेश्वर्यै । चामुण्डायै । वाराह्यै । नारसिंहिकायै । वज्राङ्ग्यै । वज्रकङ्कालायै । नृमुण्डस्रग्विण्यै । शिवायै । मालिन्यै । नरमुण्डाल्यै । गलद्रक्तविभूषणायै । रक्तचन्दनसिक्ताङ्ग्यै । सिन्दूरारुणमस्तकायै । घोररूपायै । घोरदंष्ट्रायै । घोरायै । घोरतरायै । शुभायै । महादंष्ट्रायै । महामायै । सुदत्यै । युगदन्तुरायै । सुलोचनायै । विरूपाक्ष्यै । विशालाक्ष्यै । त्रिलोचनायै । शारदेन्दुप्रसन्नास्यायै । स्फुरत्स्मेताम्बुजेक्षणायै । अट्टहासायै । प्रफुल्लास्यायै । स्मेरवक्त्रायै । सुभाषिण्यै । प्रफुल्लपद्मवदनायै । स्मितास्यायै । प्रियभाषिण्यै । कोटराक्ष्यै । कुलश्रेष्ठायै नमः । १००॥

ॐ महत्यै नमः । बहुभाषिण्यै । सुमत्यै । कुमत्यै । चण्डायै । चण्डमुण्डायै । अतिवेगिन्यै । प्रचण्डायै । चण्डिकायै । चण्ड्यै । चर्चितायै । चण्डवेगिन्यै । सुकेश्यै । मुक्तकेश्यै । दीर्घकेश्यै । महाकुचायै । प्रेतदेहकर्णपूरायै । प्रेतपाण्यै । सुमेखलायै । प्रेतासनायै । प्रियप्रेतायै । प्रेतभूमिकृतालयै । श्मशानवासिन्यै । पुण्यायै । पुण्यदायै । कुलपण्डितायै । पुण्यालयै । पुण्यदेहायै । पुण्यश्लोकायै । पावन्यै । पूतायै । पवित्रायै । परमायै । परायै । पुण्यविभूषणायै ।

पुण्यनाम्नी । भीतिहरायै । वरदायै । खड्गपाशिन्यै । नृमुण्डहस्तायै । शान्तायै । छिन्नमस्तायै । सुनासिकायै । दक्षिणायै । श्यामलायै । श्यामायै । पीनोन्नतस्तन्यै । दिगम्बर्यै । घोररावायै । सृक्कान्तरक्तवाहिन्यै । शिवासङ्गायै । निःसङ्गायै । मदनातुरायै । मत्तायै । प्रमत्तायै । मदनायै । सुधासिन्धुनिवासिन्यै । अतिमत्तायै । महामत्तायै । सर्वाकर्षणकारिण्यै । गीतप्रियै । वाद्यरतायै । प्रेतनृत्यपरायणायै । चतुर्भुजायै । दशभुजायै । अष्टादशभुजायै । कात्यायन्यै । जगन्मातायै । जगत्यै । परमेश्वर्यै । जगद्बन्ध्वै । जगद्धात्र्यै । जगदानन्दकारिण्यै । जगज्जीववत्यै । हैमवत्यै । मायै । महालयै । नागयज्ञोपवीताङ्ग्यै । नागिन्यै । नागशायिन्यै । नागकन्यायै । देवकन्यायै । गान्धार्यै । किन्नर्यै । सुर्यै । मोहरात्र्यै । महारात्र्यै । दारुणाभायै । सुरासुर्यै । विद्याधर्यै । वसुमत्यै । यक्षिण्यै । योगिन्यै । जरायै । राक्षस्यै । डाकिन्यै । वेदमय्यै । वेदविभूषणायै । श्रुतिस्मृतिमहाविद्यायै । गुह्यविद्यापुरातन्यै नमः । २००॥

ॐ चिन्तचिन्तायै नमः । स्वधायै । स्वाहायै । निद्रायै । तन्द्रायै । पार्वत्यै । अर्पणायै । निश्चलायै । लोलायै । सर्वविद्यातपस्विन्यै । गङ्गायै । काश्यै । शच्यै । सीतायै । सत्यै । सत्यपरायणायै । नीत्यै । सुनीत्यै । सुरुच्यै । तुष्ट्यै । पुष्ट्यै । धृत्यै । क्षमायै । वाण्यै । बुद्ध्यै । महालक्ष्म्यै । लक्ष्म्यै । नीलसरस्वत्यै । स्रोतस्वत्यै । स्रोतवत्यै । मातङ्ग्यै । विजयायै । जयायै । नद्यै । सिन्धवे । सर्वमय्यै । तारायै । शून्यनिवासिन्यै । शुद्धायै । तरङ्गिण्यै । मेधायै । लाकिन्यै । बहुरूपिण्यै । सदानन्दमय्यै । सत्यायै । सर्वानन्दस्वरूपिण्यै । सुनन्दायै । नन्दिन्यै । स्तुत्यायै । स्तवनीयै । स्वभाविन्यै । रङ्किण्यै । टङ्किन्यै । चित्रायै । विचित्रायै । चित्ररूपिण्यै । पद्मायै । पद्मालयायै । पद्ममुख्यै । पद्मविभूषणायै । शाकिन्यै । हाकिन्यै । क्षान्तायै । राकिण्यै । रुधिरप्रियै । भ्रान्त्यै । भवान्यै । रुद्राण्यै । मृडान्यै । शत्रुमर्दिन्यै । उपेन्द्राण्यै । महेशान्यै । ज्योत्स्नायै । इन्द्रस्वरूपिण्यै । सूर्य्यात्मिकायै । रुद्रपत्न्यै । रौद्र्यै । स्त्र्यै । प्रकृत्यै । पुमान्यै (?)। शक्त्यै । सूक्त्यै । मतिर्मत्यै । भुक्त्यै । मुक्त्यै । पतिव्रतायै । सर्वेश्वर्यै । सर्वमातायै । शर्वाण्यै । हरवल्लभायै । सर्वज्ञायै । सिद्धिदायै । सिद्धायै । भाव्यायै । भव्यायै । भयापहायै । कर्त्र्यै । हर्त्र्यै । पालयित्र्यै । शर्वर्यै नमः । ३००॥

ॐ तामस्यै नमः । दयायै । तमिस्रायै । यामिन्यै । स्थिरायै । धीरायै । तपस्विन्यै । चार्वङ्ग्यै । चञ्चलायै । लोलजिह्वायै । चारुचरित्रिण्यै । त्रपायै । त्रपावत्यै । लज्जायै । निर्लज्जायै । ह्नीङ्कार्यै (?)। रजोवत्यै । सत्त्ववत्यै । धर्मनिष्ठायै । श्रेष्ठायै । निष्ठुरवादिन्यै । गरिष्ठायै । दुष्टसंहर्त्र्यै । विशिष्टायै । श्रेयस्यै । घृणायै । भीमायै । भयानकायै । भीमनादिन्यै । भीयै । प्रभावत्यै । वागीश्वर्यै । श्रीयै । यमुनायै । यज्ञकर्त्र्यै । यजुःप्रियायै । ऋक्सामाथर्वनिलयायै । रागिण्यै । शोभनस्वरायै । कलकण्ठ्यै । कम्बुकण्ठ्यै । वेणुवीणापरायणायै । वंशिन्यै । वैष्णव्यै । स्वच्छायै । धात्र्यै । त्रिजगदीश्वर्यै । मधुमत्यै । कुण्डलिन्यै । ऋद्ध्यै । सिद्ध्यै । शुचिस्मितायै । रम्भायै । उर्वश्यै । रत्यै । रामायै । रोहिण्यै । रेवत्यै । रमायै । शङ्खिन्यै । चक्रिण्यै ।

गदिन्यै । पद्मिन्यै । शूलिन्यै । परिघास्त्रायै । पाशिन्यै । शार्ङ्गपाणिन्यै । पिनाकधारिण्यै । धूम्रायै । शरभ्यै । वनमालिन्यै । वज्रिण्यै । समरप्रीतायै । वेगिन्यै । रणपण्डितायै । जटिन्यै । बिम्बिन्यै । लावण्याम्बुध्यै । चन्द्रिकायै । बलिप्रियै । सदापूज्यायै । पूर्णायै । दैत्येन्द्रमाथिन्यै । महिषासुरसंहन्त्र्यै । वासिन्यै । रक्तदन्तिकायै । रक्तपायै । रुधिराक्ताङ्ग्यै । रक्तखर्परहस्तिन्यै । रक्तप्रियायै । मांसरुचिरायै । सवासक्तमानसायै । गलच्छोणितमुण्डालिकण्ठमालाविभूषणायै । शवासनायै । चितान्तस्थायै । माहेश्यै (महिष्यै)। वृषवाहिन्यै । व्याघ्रत्वगम्बरायै । चीनचेलिन्यै । सिंहवाहिन्यै नमः । ४०० ॥

ॐ वामदेव्यै नमः । महादेव्यै । गौर्यै । सर्वज्ञभाविन्यै । बालिकायै । तरुण्यै । वृद्धायै । वृद्धमातायै । जरातुरायै । सुभ्रुर्विलासिन्यै (शुभ्रविलासिन्यै)। ब्रह्मवादिन्यै । ब्राह्मण्यै । मह्यै । स्वप्नावत्यै । चित्रलेखायै । लोपामुद्रायै । सुरेश्वर्यै । अमोघायै । अरुन्धत्यै । तीक्ष्णायै । भोगवत्यै । अनुवादिन्यै । मन्दाकिन्यै । मन्दहासायै । ज्वालामुख्यै । असुरान्तकायै । मानदायै । मानिन्यै । मान्यायै । माननीयै । मदोद्धतायै । मदिरायै । मदिरोन्मादायै । मेध्यायै । नव्यायै । प्रसादिन्यै । सुमध्यायै । अनन्तगुणिन्यै । सर्वलोकोत्तमोत्तमायै । जयदायै । जित्वरायै । जेत्र्यै । जयश्रीयायै । जयशालिन्यै । शुभदायै । सभासङ्क्षोभकारिण्यै । शिवदूत्यै । भूतिमत्यै । विभूत्यै । भीषणाननायै । कुन्त्यै । कुलस्त्र्यै । कुलपालिकायै । कीर्त्त्यै । यशस्विन्यै । भूषायै । भूष्यायै । भूतपतिप्रियायै । सगुणायै । निर्गुणायै । धृष्टायै । निष्ठायै । काष्ठायै । प्रतिष्ठितायै । धनिष्ठायै । धनदायै । धन्यायै । वसुधायै । स्वप्रकाशिन्यै । उर्व्यै । गुर्व्यै । गुरुश्रेष्ठायै । सगुणायै । त्रिगुणात्मिकायै । महाकुलीनायै । निष्कामायै । सकामायै । कामजीवनायै । कामदेवकलायै । रामायै । अभिरामायै । शिवनर्त्तक्यै । चिन्तामणिकल्पलतायै । जाग्रत्यै । दीनवत्सलायै । कार्त्तिक्यै । कीर्त्तिकायै । कृत्यायै । अयोध्यायै । विषमायै । समायै । सुमन्त्रायै । मन्त्रिण्यै । घूर्णायै । ह्लादिन्यै । क्लेशनाशिन्यै । त्रैलोक्यजनन्यै । हृष्टायै । निर्मांसायै । मनोरूपिण्यै नमः । ५०० ॥

ॐ तडागनिम्नजठरायै नमः । शुष्कमांसास्थिमालिन्यै । अवन्त्यै । मथुरायै । त्रैलोक्यपावन्यै । इश्वर्यै । व्यक्ताव्यक्तानेकमूर्त्तिः । क्षेमङ्कर्यै । शङ्कर्यै । सर्वसम्मोहकारिण्यै । ऊर्द्धतेजस्विन्यै । क्लिन्नायै । महातेजस्विन्यै । अद्वैतायै । भोगिन्यै । पूज्यायै । युवत्यै । सर्वमङ्गलायै । सर्वप्रियङ्कर्यै । भोग्यायै । धरण्यै । पिशिताशनायै । भयङ्कर्यै । पापहरायै । निष्कलङ्कायै । वशङ्कर्यै । आशायै । तृष्णायै । चन्द्रकलायै । निद्रान्यायै (निद्राययै)। वायुवेगिन्यै । सहस्रसूर्य्यसङ्काशायै । चन्द्रकोटिसमप्रभायै । वह्निमण्डलसंस्थायै । सर्वतत्त्वप्रतिष्ठितायै । सर्वाचारवत्यै । सर्वदेवकन्यायै । अधिदेवतायै । दक्षकन्यायै । दक्षयज्ञनाशिन्यै । दुर्गतारिकायै । इज्यायै । विभीर्भूत्यै । सत्कीर्त्त्यै । ब्रह्मरूपिण्यै । रम्भोरवे । चतुरायै । राकायै । जयन्त्यै । करुणायै । कुहवे । मनस्विन्यै । देवमातायै । यशस्यायै । ब्रह्मचारिण्यै । ऋद्धिदायै । वृद्धिदायै

। वृद्ध्यै । सर्वाद्यायै । सर्वदायिन्यै । आधाररूपिण्यै । ध्येयायै । मूलाधारनिवासिन्यै । आज्ञायै । प्रज्ञायै । पूर्णमनायै । चन्द्रमुख्यै । अनुकूलिन्यै । वावदूकायै । निम्ननाभ्यै । सन्ध्यायै । दृढव्रतायै । आन्वीक्षिक्यै । दण्डनीत्यै । त्रय्यै । त्रिदिवसुन्दर्यै । ज्वलिन्यै । ज्वालिन्यै । शैलतनयायै । विन्ध्यवासिन्यै । अमेयायै । खेचर्यै । धैर्य्यायै । तुरीयायै । विमलातुरायै । प्रगल्भायै । वारुण्यै । छायायै । शशिन्यै । विस्फुलिङ्गिन्यै । भुक्त्यै । सदाप्राप्त्यै । प्राकाम्यायै । महिमायै । अणिमायै । इच्छासिद्ध्यै । विसिद्धायै । वशित्वायै । ऊर्द्ध्वनिवासिन्यै । लघिमायै नमः । ६००॥

ॐ गायत्र्यै नमः । सावित्र्यै । भुवनेश्वर्यै । मनोहरायै । चितायै । दिव्यायै । देव्यै । उदारायै । मनोरमायै । पिङ्गलायै । कपिलायै । जिह्वायै । रसज्ञायै । रसिकायै । रसायै । सुषुम्नायै । ईडायै । भोगवत्यै । नरकान्तकायै । पाञ्चाल्यै । रुक्मिण्यै । राधायै । आराध्यायै । भीमायै । अधिराधिकायै । अमृतायै । तुलस्यै । वृन्दायै । कैटभ्यै । कपटेश्वर्यै । उग्रचण्डेश्वर्यै । वीरायै । जनन्यै । वीरसुन्दर्यै । उग्रतारायै । यशोदाख्यायै । दैवक्यै । देवमानितायै । निरञ्जनायै । चित्रदेव्यै । क्रोधिन्यै । कुलदीपिकायै । कुलवागीश्वर्यै । मातृकायै । द्राविण्यै । द्रवायै । योगेश्वर्यै । महामार्यै । भ्रामर्यै । बिन्दुरूपिण्यै । दूत्यै । प्राणेश्वर्यै । गुप्तायै । बहुलायै । चामर्यै । प्रभायै । कुञ्जि(ब्जि)कायै । ज्ञानिन्यै । ज्येष्ठायै । भुशुण्ड्यै । प्रकटायै । (अ)तिथ्यै । द्रविण्यै । गोपन्यै । मायायै । कामबीजेश्वर्यै । क्रियायै । शाम्भव्यै । केकरायै । मेनायै । मूसलास्त्रायै । तिलोत्तमायै । अमेयविक्रमायै । क्रूरायै । सम्पत्शालायै । सुस्थ्यै । हव्यवहायै । प्रीत्यै । उष्मायै । धूम्रायै । चिरङ्गदायै । तपिन्यै । तापिन्यै । विश्वायै । भोगदायै । धारिण्यै । धरायै । त्रिखण्डायै । बोधिन्यै । वश्यायै । सकलायै । शब्दरूपिण्यै । बीजरूपायै । महामुद्रायै । योनिरूपिण्यै । अनङ्गकुसुमायै । अनङ्गमेखलायै । अनङ्गरूपिण्यै । वज्रेश्वर्यै । जयिन्यै नमः । ७००॥

ॐ सर्वद्वन्द्वक्षयङ्कर्यै नमः । षडङ्गयुवत्यै । योगयुक्तायै । ज्वालांशुमालिन्यै । दुराशयै । दुराधारायै । दुर्जयै । दुर्गरूपिण्यै । दुरन्तायै । दुष्कृतिहरायै । दुर्ध्येयै । दुरतिक्रमायै । हंसेश्वर्यै । त्रिकोणस्थायै । शाकम्भर्य्यै । अनुकम्पिन्यै । त्रिकोणनिलयै । नित्यायै । परमामृतरञ्जितायै । महाविद्येश्वर्यै । श्वेतायै । भेरुण्डायै । कुलसुन्दर्यै । त्वरितायै । भक्तिसंसक्तायै । भक्तवश्यायै । सनातन्यै । भक्तानन्दमय्यै । भक्तभाविकायै । भक्तशङ्कर्यै । सर्वसौन्दर्य्यनिलयायै । सर्वसौभाग्यशालिन्यै । सर्वसम्भोगभवनायै । सर्वसौख्यनिरूपिण्यै । कुमारीपूजनरतायै । कुमारीव्रतचारिण्यै । कुमारीभक्तिसुखिन्यै । कुमारीरूपधारिण्यै । कुमारीपूजकप्रीतायै । कुमारीप्रीतिदायै । प्रियायै । कुमारीसेवकासङ्गायै । कुमारीसेवकालयायै । आनन्दभैरव्यै । बालायै । भैरव्यै । वटुभैरव्यै । श्मशानभैरव्यै । कालभैरव्यै । पुरभैरव्यै । महाभैरवपत्न्यै । परमानन्दभैरव्यै । सुधानन्दभैरव्यै । उन्मादानन्दभैरव्यै । मुक्तानन्दभैरव्यै । तरुणभैरव्यै । ज्ञानानन्दभैरव्यै । अमृतानन्दभैरव्यै । महाभयङ्कर्यै । तीव्रायै । तीव्रवेगायै । त्रिपुरायै ।

परमेशान्यै । सुन्दर्यै । पुरसुन्दर्यै । त्रिपुरेश्यै । पञ्चदश्यै । पञ्चम्यै । पुरवासिन्यै । महासप्तदश्यै । षोडश्यै । त्रिपुरेश्वर्यै । महाङ्कुशस्वरूपायै । महाचक्रेश्वर्यै । नवचक्रेश्वर्यै । चक्रेश्वर्यै । त्रिपुरमालिन्यै । राजराजेश्वर्यै । महात्रिपुरसुन्दर्यै । सिन्दूरपूररुचिरायै । श्रीमत्त्रिपुरसुन्दर्यै । सर्वाङ्गसुन्दर्यै । रक्तायै । रक्तवस्त्रोत्तरीयिण्यै । जवायै । यावकसिन्दूररक्तचन्दनधारिण्यै । जवायावकसिन्दूररक्तचन्दनरूपधृतायै । चामरीबालकुटिलनिर्मलश्यामकेशिन्यै । वज्रमौक्तिकरत्नाढ्यकिरीटमुकुटोज्ज्वलायै । रत्नकुण्डलसंसक्तस्फुरद्गण्डमनोरमायै । कुञ्जरेश्वरकुम्भोत्थमुक्तारञ्जितनासिकायै । मुक्ताविद्रुममाणिक्यहाराढ्यस्तनमण्डलायै । सूर्य्यकान्तेन्दुकान्ताढ्यस्पर्शाश्मकण्ठभूषणायै । बीजपूरस्फुरद्बीजदन्तपङ्क्तिरनुत्तमायै । कामकोदण्डकाभुग्नभ्रूकटाक्षप्रवर्षिण्यै । मातङ्गकुम्भवक्षोजायै । लसत्कोकनदेक्षणायै । मनोज्ञशष्कुलीकर्णायै । हंसीगतिविडम्बिन्यै । पद्मरागाङ्गदज्योतिर्दायै नमः । ८००॥

ॐ चतुष्कप्रकाशिन्यै नमः । नानामणिपरिस्फूर्जच्छुद्धकाञ्चनकङ्कनायै । नागेन्द्रदन्तनिर्माणवलयाङ्कितपाणि । अङ्गुरीयकचित्राङ्ग्यै । विचित्रक्षुद्रघण्टिकायै । पट्टाम्बरपरीधानायै । कलमञ्जीरशिञ्जिन्यै । कर्पूरागुरुकस्तूरीकुङ्कमद्रवलेपितायै । विचित्ररत्नपृथिवीकल्पशाखितलस्थितायै । रत्नद्वीपस्फुरद्रक्तसिंहासनविलासिन्यै । षट्चक्रभेदनकर्यै । परमानन्दरूपिण्यै । सहस्रदलपद्मान्तश्चन्द्रमण्डलवर्त्तिन्यै । ब्रह्मरूपशिवक्रोडनानासुखविलासिन्यै । हरविष्णुविरिञ्चीन्द्रग्रहनायकसेवितायै । शैवायै । शिववादिन्यै । मातङ्गिन्यै । श्रीमत्यै । आनन्दमेखलायै । उपयोगिन्यै । मतायै । शिवरूपिण्यै । अलम्बुषायै । वेगवत्यै । क्रोधरूपायै । हस्तिजिह्वायै । शुभङ्कर्यै । ब्रह्मदूत्यै । सुषुम्नायै । गन्धिन्यै । आत्मयोन्यै । ब्रह्मयोन्यै । जगद्योन्यै । अयोनिजायै । भगरूपायै । भगस्थात्र्यै । भगिन्यै । भगरूपिण्यै । भगात्मिकायै । भगाधाररूपिण्यै । भगमालिन्यै । लिङ्गाख्यायै । लिङ्गेश्यै । त्रिपुराभैरव्यै । लिङ्गगीत्यै । सुगीत्यै । लिङ्गस्थायै । लिङ्गरूपधृतायै । लिङ्गमानायै । लिङ्गभवायै । लिङ्गलिङ्गायै । भगवत्यै । कौशिक्यै । प्रेमायै । प्रियंवदायै । गृध्ररूपायै । शिवारूपायै । चक्ररूपधृतायै । लिङ्गाभिधायिन्यै । लिङ्गप्रियायै । लिङ्गनिवासिन्यै । लिङ्गिन्यै । लिङ्गरूपिण्यै । लिङ्गसुन्दर्यै । लिङ्गगीतिमहाप्रीतायै । भगगीतिमहासुखायै । लिङ्गनामसदानन्दायै । भगनामसदागत्यै । लिङ्गमालाकण्ठभूषायै । भगमालाविभूषणायै । भगलिङ्गामृतप्रीतायै । भगलिङ्गामृतात्मिकायै । भगलिङ्गार्चनप्रीतायै । भगलिङ्गस्वरूपिण्यै । भगलिङ्गस्वरूपायै । भगलिङ्गसुखावहायै । स्वयम्भूकुसुमप्रीतायै । स्वयम्भूकुसुमार्चितायै । स्वयम्भूकुसुमप्राणायै । स्वयम्भूकुसुमोत्थितायै । स्वयम्भूकुसुमस्नातायै । स्वयम्भूपुष्पतर्पितायै । स्वयम्भूपुष्पघटितायै । स्वयम्भूपुष्पधारिण्यै । स्वयम्भूपुष्पतिलकायै । स्वयम्भूपुष्पचर्चितायै । स्वयम्भूपुष्पनिरतायै । स्वयम्भूकुसुमग्रहायै । स्वयम्भूपुष्पयज्ञांशायै । स्वयम्भूकुसुमात्मिकायै । स्वयम्भूपुष्पनिचितायै । स्वयम्भूकुसुमप्रियायै । स्वयम्भूकुसुमादानलालसोन्मत्तमानसायै । स्वयम्भूकुसुमानन्दलहरीस्निग्धदेहिन्यै ।

स्वयम्भूकुसुमाधारायै । स्वयम्भूकुसुमाकुलायै । स्वयम्भूपुष्पनिलयायै । स्वयम्भूपुष्पवासिन्यै । स्वयम्भूकुसुमस्निग्धायै नमः । ९०० ॥

ॐ स्वयम्भूपुष्पकरिण्यै नमः । स्वयम्भूपुष्पपाणिकायै । स्वयम्भूकुसुमध्यानायै । स्वयम्भूकुसुमप्रभायै । स्वयम्भूकुसुमज्ञानायै । स्वयम्भूपुष्पभोगिन्यै । स्वयम्भूकुसुमोल्लासायै । स्वयम्भूपुष्पवर्षिण्यै । स्वयम्भूकुमुमोत्साहायै । स्वयम्भूपुष्परूपिण्यै । स्वयम्भूकुसुमोन्मादायै । स्वयम्भूपुष्पसुन्दर्यै । स्वयम्भूकुसुमाराध्यायै । स्वयम्भूकुसुमोद्भवायै । स्वयम्भूकुसुमव्यग्रायै । स्वयम्भूपुष्पपूर्णितायै । स्वयम्भूपूजकप्रज्ञायै । स्वयम्भूहोतृमातृकायै । स्वयम्भूदातृरक्षित्र्यै । स्वयम्भूरक्ततारिकायै । स्वयम्भूपूजकग्रस्तायै । स्वयम्भूपूजकप्रियायै । स्वयम्भूवन्दकाधारायै । स्वयम्भूनिन्दकान्तकायै । स्वयम्भूप्रदसर्वस्वायै । स्वयम्भूप्रदपुत्त्रिण्यै । स्वयम्भूप्रदसस्मेरायै । स्वयम्भूप्रदशरीरिण्यै । सर्वकालोद्भवप्रीतायै । सर्वकालोद्भवात्मिकायै । सर्वकालोद्भवोद्भावायै । सर्वकालोद्भवोद्भवायै । कुण्डपुष्पसदाप्रीतिर्गोलपुष्पसदारत्यै । कुण्डगोलोद्भवप्राणायै । कुण्डगोलोद्भवात्मिकायै । स्वयम्भवायै । लोकपावन्यै । विमेधायै । शक्रसुन्दर्यै । अश्विन्यै । कृत्तिकायै । पुष्यायै । तेजस्कायै । चन्द्रमण्डलायै । सूक्ष्मायै । असूक्ष्मायै । वलाकायै । भयनाशिन्यै । वरदायै । भयदायै । मुक्तिबन्धविनाशिन्यै । कामुकायै । दुःखदायै । सुखदायै । मोक्षायै । मोक्षदार्थप्रकाशिन्यै । दुष्टायै । दुष्टमत्यै । सर्वकार्य्यविनाशिन्यै । शुक्राधारायै । शुक्ररूपायै । शुक्रसिन्धुनिवासिन्यै । शुक्रालयायै । शुक्रभोगायै । शुक्रपूजासदारत्यै । शुक्रपूज्यायै । शुक्रहोमसन्तुष्टायै । शुक्रवत्सलायै । शक्रमूर्त्यै । शुक्रदेहायै । शुक्रपूजकपुत्त्रिण्यै । शुक्रस्थायै । शुक्रिण्यै । शुक्रसंस्पृहायै । शुक्रसुन्दर्यै । शुक्रस्नातायै । शुक्रकर्यै । शुक्रसेव्यायै । अतिशुक्रिण्यै । महाशुक्रायै । शुक्रभवायै । शुक्रवृष्टिविधायिन्यै । शुक्राभिधेयायै । शुक्रार्हायै । शुक्रवन्दकवन्दितायै । शुक्रानन्दकर्यै । शुक्रसदानन्दाभिधायिकायै । शुक्रोत्सवायै । सदाशुक्रपूर्णायै । शुक्रमनोरमायै । शुक्रपूजकसर्वस्वायै । शुक्रनिन्दकनाशिन्यै । शुक्रात्मिकायै । शुक्रसम्पदायै । शुक्राकर्षणकारिण्यै । शारदायै । साधकप्राणायै । साधकासक्तमानसायै । साधकोत्तमसर्वस्वायै । साधकाभक्तरक्तपायै नमः । १००० ॥

ॐ साधकानन्दसन्तोषायै नमः । साधकानन्दकारिण्यै । आत्मविद्यायै । ब्रह्मविद्यायै । परब्रह्मस्वरूपिण्यै । त्रिकूटस्थायै । पञ्चकूटायै । सर्वकूटशरीरिण्यै । सर्ववर्णमय्यै । वर्णजय(प)मालाविधायिन्यै नमः । १०१० ॥

इति श्यामारहस्ये दक्षिणकालिकासहस्रनामस्तोत्रव्युत्पन्ना दक्षिणकालिकासहस्रनामावलिः सम्पूर्णा ।

- ॥ श्यामारहस्यम् । चतुर्थः परिच्छेदः ॥

- .. shyAmArahasyam . chaturthaH parichChedaH ..

Notes:

The Namavali has been derived from the Stotram that can be accessed from one of the links given below. The number of names are above 1000 after about 40 duplicated names were removed.

Encoded and proofread by Ruma Dewan

*Dakshinakalikasahasranamavali*

pdf was typeset on March 19, 2025

Please send corrections to *sanskrit@cheerful.com*